**पाठ्यक्रमः - Syllabus**

# राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

## विद्यावारिधिप्रवेशपरीक्षायाः पाठ्यक्रमः

**बहुविकल्पात्मकाः प्रश्नाः (MCQ) - 50** **पूर्णाङ्काः - 50**

| क्रम.सं | शास्त्रम्/विषयः | पाठ्यक्रमः |
|---|---|---|
| 1. | व्याकरणम् | परिभाषेन्दुशेखरः - 1-20 परिभाषाः, महाभाष्यम् – पष्पशाह्निकम् |

16/3/23

# आदर्शप्रश्नपत्रम्

(अत्र प्रश्नपत्रस्य प्रारूपमात्रं प्रदत्तम् । प्रवेशपरीक्षायां भवद्भ्यः प्रदत्तात् पाठ्यक्रमात् एव प्रश्नाः भवेयुः ।

## राष्ट्रियसंस्कृतविश्वविद्यालयःतिरुपतिः

## विद्यावारिधिः

**शास्त्रम् - व्याकरणम्** **पूर्णाङ्काः - 100**

**(अस्मिन् प्रश्नपत्रे भागद्वयं भविष्यति । प्रत्येकस्मिन् भागे 50 बहुविकल्पीयाः एकाङ्कीयाः प्रश्नाः भविष्यन्ति ।)**

1. नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारमित्यादिकारिका कुत्रोपलभ्यते?
   - A पाणिनीयशिक्षायाम्
   - B वाक्यपदीये
   - C नन्दिकेश्वरकाशिकायाम्
   - D काशिकायाम्
2. नागेशमते"एकाच उपदेशेऽनुदात्तात्" इत्यादौ उपदेशशब्दः किमन्तः ?
   - A करणघञन्तः
   - B भावघञन्तः
   - C अधिकरणघञन्तः
   - D कर्मसाधनः
3. "मुखनासिकावचनोऽनुनासिकः" इति सूत्रे वचनः इति कस्मिन्नर्थे ल्युट् ?
   - A करणे
   - B अधिकरणे
   - C कर्मणि
   - D कर्तरि
4. "न वेति विभाषा" इति सूत्रस्योपयोगः –
   - A उभयत्रविभाषायाम्
   - B प्राप्तविभाषायाम्
   - C अप्राप्तविभाषायाम्
   - D निषेधार्थमेव
5. आभ्यन्तरप्रयत्नो भवति –
   - A त्रिविधः
   - B चतुर्विधः
   - C पञ्चविधः
   - D द्विविधः
6. "अ अ" इति सूत्रे दीर्घाभावः कुतः ?
   - A प्रयत्नभेदात्
   - B सूत्रकारनिर्देशात्
   - C सवर्णदीर्घस्यानित्यत्वात्
   - D निपातनात्
7. "अवङ् स्फोटायनस्य" इति सूत्रे स्फोटायनशब्देन किं विवक्षितम् ?
   - A स्फोटात्मकः शब्दः
   - B कश्चिदाचार्यः
   - C ध्वनिः
   - D यदृच्छाशब्दः
8. वर्णानामुपदेशः वृत्तिसमवायार्थः इत्यत्र समवायो नाम कः ?
   - A वर्णानामानुपूर्व्येण संनिवेशः
   - B समुदायविशेषः
   - C वर्णसङ्घातः
   - D समवायाख्यः सम्बन्धः
9. "वृद्धिरादैच्" इति सूत्रे"चोः कुः" इति कुत्वं कस्मान्न भवति?
   - A सौत्रत्वात्
   - B भत्वात्
   - C छान्दसत्वात्
   - D निपातनात्

RNSastry
16/3/23

10. पूर्वोच्चारितः संज्ञी, परोच्चारिता संज्ञा इति नियमसत्त्वेऽपि “वृद्धिरादैच्” इति सूत्रे संज्ञाशब्दः कुतः पूर्वमुच्चार्यते?

A लाघवार्थम् B वैशिष्ट्यप्रदर्शनार्थम्

C पूर्वोक्तनियमस्यानित्यत्वद्योतनार्थम् D मङ्गलार्थम्

11. “इको गुणवृद्धी” इति सूत्रे कः सिद्धान्तपक्षः ?

A तच्छेषपक्षः B तदपवादपक्षः

C पदोपस्थितिपक्षः D क्रोष्ट्रीयमतम्

12. “न धातुलोप आर्धधातुके” इति सूत्रे आर्धधातुकग्रहणं कस्य विशेषणम् ?

A लोपस्य B गुणवृद्ध्योः

C पूर्वोक्तयोरुभयोः D नोभयोः

13. “ईदूदेद् द्विवचनं प्रगृह्यम्” इति सूत्रार्थवर्णनप्रसङ्गे प्रदर्शितेषु चतुर्षु पक्षेषु कतमः ज्यायान् ?

A ईदादयो द्विवचनं प्रगृह्या इति B ईदाद्यन्तं द्विवचनं प्रगृह्यमिति

C ईदाद्यन्तं यद् द्विवचनान्तमिति D ईदाद्यन्तं यद् द्विवचनं तदन्तमीदाद्यन्तमिति

14. ङिदाकारः क्व नास्ति ?

A ईषदर्थे B क्रियायोगे

C मर्यादाभिविधौ D वाक्यस्मरणयोः

15. “सर्वादीनि सर्वनामानि” इति सूत्रेण ‘सर्व’शब्दस्य सर्वनामसंज्ञा कथं सिध्यति ?

A तद्गुणसंविज्ञानबहुव्रीहिणा B अतद्गुणसंविज्ञानबहुव्रीहिणा

C निपातनात् D सूत्रे पाठात्

16. प्रातिपदिकार्थसूत्रे नागेशाभिमतः प्रातिपदिकार्थः कः ?

A नियतोपस्थितिकः B प्रवृत्तिनिमित्तं तदाश्रयश्च

C लिङ्गमात्रम् D परिमाणमात्रम्

17. नागेशोक्तरीत्या किं नाम कारकत्वम्?

A क्रियाजनकत्वम् B क्रियान्वितप्रत्ययार्थान्वयित्वम्

C क्रियान्वयित्वम् D क्रियानिमित्तत्वम्

18. सम्प्रदानं कतिविधम् ?

A एकविधम् B द्विविधम्

C त्रिविधम् D चतुर्विधम

19. “परिक्रयणे सम्प्रदानमन्यतरस्याम्” इत्यत्र परिक्रयणशब्दः –

A भावल्युडन्तः B करणल्युडन्तः

C कर्मल्युडन्तः D अधिकरणल्युडन्तः

20. विप्राय हितम् इत्यत्र को हितपदार्थः ?

A साहित्यम् B इष्टसाधनम्

C धनम् D साहाय्यम्

21. अपादानस्य कति भेदाः ?

A द्वौ B त्रयः

C चत्वारः D पञ्च

RHShastry 16/3/23

22. अन्नस्य हेतोर्वसति इत्यत्र कः षष्ठ्यर्थः ?

A हेतुहेतुमद्भावः
B सम्बन्धमात्रम्
C स्वस्वामिभावः
D आर्थिकः

23. गुरौ वसति इत्यत्र गुरुः कीदृक् अधिकरणम् ?

A औपश्लेषिकम्
B वैषयिकम्
C अभिव्यापकम्
D एतत्त्रितयेतरविलक्षणमेव

24. नागेशमते का नाम शक्तिः ?

A वाच्यवाचकभावः
B बोधजनकता
C ईश्वरेच्छा
D तादात्म्यम्

25. निपातानां द्योतकत्वसाधनाय का वृत्तिरवश्यमङ्गीकार्या ?

A लक्षणा
B निरूढलक्षणा
C व्यञ्जना
D शक्तिः

**एवं क्रमेण पाठ्यक्रमानुगुणं 50 प्रश्नाः भवेयुः ।**

******

Rinsedy
16/3/23